श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ पञ्चसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ पञ्चसप्ततितमः सर्गः ॥

## पुष्पकमारूढेन श्रीरामेण स्वराज्यस्य सर्वदिक्षु भ्रान्त्वा दुष्कर्मणोऽनुसन्धानं सर्वत्र सत्कर्मैव दृष्ट्वा दक्षिणस्यां दिशि तपस्विनः शूद्रस्य पार्श्वे गमनम्

नारदस्य तु तद् वाक्यं श्रुत्वामृतमयं यथा।
प्रहर्षमतुलं लेभे लक्ष्मणं चेदमब्रवीत्॥ **7.75.1** ॥

गच्छ सौम्य द्विजश्रेष्ठं समाश्वासय सुव्रत।
बालस्य च शरीरं तत् तैलद्रोण्यां निधापय॥ **7.75.2** ॥

गन्धैश्च परमोदारैस्तैलैश्च सुसुगन्धिभिः।
यथा न क्षीयते बालस्तथा सौम्य विधीयताम्॥ **7.75.3** ॥

यथा शरीरो बालस्य गुप्तः सन् क्लिष्टकर्मणः।
विपत्तिः परिभेदो वा न भवेच्च तथा कुरु॥ **7.75.4** ॥

एवं सन्दिश्य काकुत्स्थो लक्ष्मणं शुभलक्षणम्।
मनसा पुष्पकं दध्यावागच्छेति महायशाः॥ **7.75.5** ॥

इङ्गितं स तु विज्ञाय पुष्पको हेमभूषितः।
आजगाम मुहूर्तेन समीपे राघवस्य वै॥ **7.75.6** ॥

सोऽब्रवीत् प्रणतो भूत्वा अयमस्मि नराधिप।
वश्यस्तव महाबाहो किङ्करः समुपस्थितः॥ **7.75.7** ॥

भाषितं रुचिरं श्रुत्वा पुष्पकस्य नराधिपः।
अभिवाद्य महर्षीन् स विमानं सोऽध्यरोहत॥ **7.75.8** ॥

धनुर्गृहीत्वा तूणीं च खड्गं च रुचिरप्रभम्।
निक्षिप्य नगरे चैतौ सौमित्रिभरतावुभौ॥ **7.75.9** ॥

प्रायात् प्रतीचीं हरितं विचिन्वंश्च ततस्ततः।
उत्तरामगमच्छ्रीमान् दिशं हिमवतावृताम्॥ **7.75.10** ॥

अपश्यमानस्तत्रापि स्वल्पमप्यथ दुष्कृतम्।
पूर्वामपि दिशं सर्वामथापश्यन्नराधिपः॥ **7.75.11** ॥

प्रविशुद्धसमाचारामादर्शतलनिर्मलाम्।
पुष्पकस्थो महाबाहुस्तदापश्यन्नराधिपः॥ **7.75.12** ॥

दक्षिणां दिशमाक्रामत् ततो राजर्षिनन्दनः।
शैवलस्योत्तरे पार्श्वे ददर्श सुमहत्सरः॥ **7.75.13** ॥

तस्मिन् सरसि तप्यन्तं तापसं सुमहत्तपः।
ददर्श राघवः श्रीमाल्लम्बमानमधोमुखम्॥ **7.75.14** ॥

राघवस्तमुपागम्य तप्यन्तं तप उत्तमम्।
उवाच च नृपो वाक्यं धन्यस्त्वमसि सुव्रत॥ **7.75.15** ॥

कस्यां योन्यां तपोवृद्ध वर्तसे दृढविक्रम।
कौतूहलात् त्वां पृच्छामि रामो दाशरथिर्ह्यहम्॥ **7.75.16** ॥

कोऽर्थो मनीषितस्तुभ्यं स्वर्गलाभोऽपरोऽथवा।
वराश्रयो यदर्थं त्वं तपस्यन्यैः सुदुश्चरम् ॥ **7.75.17** ॥

यमाश्रित्य तपस्तप्तं श्रोतुमिच्छामि तापस।
ब्राह्मणो वासि भद्रं ते क्षत्रियो वासि दुर्जयः।
वैश्यस्तृतीयो वर्णो वा शूद्रो वा सत्यवाग् भव ॥ **7.75.18** ॥

इत्येवमुक्तः स नराधिपेन
    अवाक्शिरा दाशरथाय तस्मै।
उवाच जातिं नृपपुङ्गवाय
    यत्कारणं चैव तपःप्रयत्नः ॥ **7.75.19** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे पञ्चसप्ततितमः सर्गः ॥